# शान्तिगीता (Śāntigītā) : **Chapter 2**

**अथ द्वितीयोऽध्यायः**

अर्जुन उवाच ।

मनोबुद्धीन्द्रियादीनां य आत्मा न हि गोचरः ।
स कथं लभ्यते कृष्ण तद्ब्रूहि यदुनन्दन ॥ १॥

श्रीभगवानुवाच ।

आत्मातिसूक्ष्मरूपत्वात् बुद्ध्यादीनामगोचरः ।
लभ्यते वेदवाक्येन चाचार्यानुग्रहेण वै ॥ २॥
महावाक्यविचारेण गुरूपदिष्टमार्गतः ।
शिष्यो गुणाभिसम्पन्नो लभेत शुद्धमानसः ॥ ३॥
एकार्थबोधकं वेदे महावाक्यचतुष्टयम् ।
तत्त्वमसि गुरोर्वक्त्रात् श्रुत्वा सिद्धिमवाप्नुयात् ॥ ४॥
गुरुसेवां प्रकुर्वाणो गुरुभक्तिपरायणः ।
गुरोः कृपावशात् पार्थ लभ्य आत्मा न संशयः ॥ ५॥
आत्मवासनया युक्तो जिज्ञासुः शुद्धमानसः ।
विषयासक्तिसंत्यक्तः स्वात्मानं वेत्ति श्रद्धया ॥ ६॥
वैराग्यं कारणं चादौ यद्भवेद्बुधिशुद्धितः ।
कर्मणा चित्तशुद्धिः स्याद्विशेषं शृणु कथ्यते ॥ ७॥
स्ववर्णाश्रमधर्मेण वेदोक्तेन च कर्मणा ।
निष्कामेन सदाचार ईश्वरं परितोषयेत् ॥ ८॥
कामसङ्कल्पसंत्यागादीश्वरप्रीतिमानसात् ।
स्वधर्मपालनाच्चैव श्रद्धाभक्तिसमन्वयात् ॥ ९॥
नित्यनैमित्तिकाचारात् ब्रह्मणि कर्मणोऽर्पणात् ।
देवायतनतीर्थानां दर्शनात् परिसेवनात् ।
यथाविधि क्रमेणैव बुद्धिशुद्धिः प्रजायते ॥ १०॥
पापेन मलिना बुद्धिः कर्मणा शोधिता यदा ।
तदा शुद्धा भवेत् सैव मलदोषविवर्जनात् ॥ ११॥
निर्मलायां तत्र पार्थ विवेक उपजायते ।
किं सत्यं किमसत्यं वेत्यद्यालोचनतत्परः ॥ १२॥

***atha dvitīyo adhyāyaḥ***

*arjuna uvāca*

*mano-buddhīndriyādīnāṃ yaḥ ātmā na hi gocaraḥ .*
*sa katham labhyate kṛṣṇa tat brūhi yadu-nandana.1*

*śrībhagavān uvāca.*
*ātmā atisūkṣma-rūpatvāt buddhyādīnām agocarah,*
*labhyate veda-vākyena ca ācāryānugraheṇa vai. 2*

*mahāvākya-vicāreṇa gurūpadiṣṭa-mārgatah,*
*śiṣyo guṇābhisampanno labheta śuddha-mānasaḥ. 3*

*ekārtha-bodhakam vede mahāvākya-catuṣṭayam,*
*tat tvam asi guror vaktrāt śrutvā siddhimavāpnuyāt.4*

*guru-sevāṃ prakurvāṇo guru-bhakti-parāyaṇah,*
*guroḥ kṛpā-vaśāt pārtha labhya ātmā na saṃśayaḥ. 5*
*ātma-vāsanayā yukto jijñāsuḥ śuddha-mānasah,*
*viṣayāsakti-saṃtyaktaḥ svātmānaṃ vetti śraddhayā.6*
*vairāgyaṃ kāraṇaṃ ca ādau yat bhaved-budhi-śuddhitah,*
*karmaṇā citta-śuddhiḥ syāt viśeṣaṃ śṛṇu kathyate. 7*
*sva-varṇāśrama-dharmeṇa vedoktena ca karmaṇā,*
*niṣkāmena sadācāraḥ īśvaraṃ paritoṣayet. 8*
*kāma-saṅkalpa-saṃtyāgāt īśvara-prīti-mānasāt,*
*svadharma-pālanāt ca eva śraddhā-bhakti-samanvayāt. 9*
*nitya-naimittikācārāt brahmaṇi karmaṇo 'rpaṇāt,*
*devāyatana-tīrthānāṃ darśanāt pari-sevanāt,*
*yathā-vidhi krameṇa eva buddhi-śuddhiḥ prajāyate. 10*
*pāpena malinā buddhiḥ karmaṇā śodhitā yadā,*
*tadā śuddhā bhavet sā eva mala-doṣa-vivarjanāt. 11*
*nirmalāyāṃ tatra pārtha viveka upajāyate,*
*kiṃ satyaṃ kim-asatyaṃ vetyadya-ālocana-tatparaḥ. 12*

| | |
|---|---|
| ब्रह्म सत्यं जगन्मिथ्या विवेकाद्दृढनिश्चयः ।<br>ततो वैराग्यमासक्तेस्त्यागो मिथ्यात्मकेषु च ॥ १३॥ | *brahma satyaṃ jagat mithyā vivekāt dṛḍha-niścayah,<br>tato vairāgyam āsaktes tyāgo mithyātmakeṣu ca. 13* |
| भोग्यं वै भोगिभोगं विषमयविषयं प्लोषिणी चापि पत्नी<br>वित्तं चित्तप्रमाथं निधनकरधनं शत्रुवत् पुत्रकन्ये ।<br>मित्रं मित्रोपतापं वनमिव भवनं चान्धुवद्न्धुवर्गाः<br>सर्वं त्यक्त्वा विरागी निजहितनिरतः सौख्यलाभे प्रसक्तः ॥ १४॥ | *bhogyaṃ vai bhogi-bhogaṃ viṣamaya-viṣayaṃ ploṣiṇī ca api patnī<br>vittam citta-pramāthaṃ nidhana-kara-dhanaṃ śatruvat putra-kanye,<br>mitraṃ mitropatāpaṃ vanam iva bhavanam ca andhuvat bandhu-vargāḥ<br>sarvaṃ tyaktvā virāgī nija-hita-nirataḥ saukhya-lābhe prasaktaḥ. 14* |
| भोगासक्ताः प्रमुग्धाः सततधनपरा भ्राम्यमाणा यथेच्छं<br>दारापत्यादिरक्ता निजजनभरणे व्यग्रचित्ता विषण्णाः।<br>लप्स्येऽहं कुत्र दर्भं स्मरणमनुदिनं चिन्तया व्याकुलात्मा<br>हा हा लोका विमूढाः सुखरसविमुखाः केवला दुःखभाराः ॥ १५॥ | *bhogāsaktāḥ pramugdhāḥ satata-dhana-parā bhrāmyamāṇā yatheccham<br>dārāpatyādi-raktāḥ nija-jana-bharaṇe vyagra-cittāḥ viṣaṇṇāḥ,<br>lapsye 'haṃ kutra darbhaṃ smaraṇam anudinaṃ cintayā vyākulātmā<br>hā hā lokā vimūḍhāḥ sukha-rasa-vimukhāḥ kevalāḥ duḥkha-bhārāḥ. 15* |
| ब्रह्मादि स्तम्बपर्यन्तं वस्तु सर्वं जुगुप्सितम् ।<br>शुनो विष्ठासमं त्याज्यं भोगवासनया सह ॥ १६॥ | *brahmādi-stamba-paryantam vastu sarvaṃ jugupsitam,<br>śuno viṣṭhā-samaṃ tyājyaṃ bhoga-vāsanayā saha. 16* |
| नोदेति वासना भोगे घृणा वान्ताशने यथा ।<br>ततः शमदमौ चैव मन इन्द्रियनिग्रहः ॥ १७॥ | *na udeti vāsanā bhoge ghṛṇā vā antāśane yathā,<br>tataḥ śama-damau ca eva mana indriya-nigrahaḥ. 17* |
| तितिक्षोपरतिश्चैव समाधानं ततः परम् ।<br>श्रद्धा श्रुति-गुरोर्वाक्ये विश्वासः सत्यनिश्चयात् ॥ १८॥ | *titikṣ-paratiś ca eva samādhānam tataḥ param,<br>śraddhā-śruti-guror vākye viśvāsaḥ satya-niścayāt. 18* |
| संसारग्रन्थिभेदेन मोक्तुमिच्छा मुमुक्षुता ।<br>एतत्साधनसम्पन्नो जिज्ञासुर्गुरुमाश्रयेत् ॥ १९॥ | *saṃsāra-granthi-bhedena moktum icchā mumukṣutā.<br>etat-sādhana-sampanno jijñāsur gurum āśrayet. 19* |
| ज्ञानदाता गुरुः साक्षात् संसारार्णवतारकः ।<br>श्रीगुरुकृपया शिष्यस्तरेत् संसारवारिधिम् ॥ २०॥ | *jñāna-dātā guruḥ sākṣāt saṃsārarṇava-tārakah,<br>śrīguru-kṛpayā śiṣyas taret saṃsāra-vāridhim. 20* |
| विनाचार्यं न हि ज्ञानं न मुक्तिर्नापि सद्गतिः ।<br>अतः प्रयत्नतो विद्वान् सेवया तोषयेद्गुरुम् ॥ २१॥ | *vinā ācāryaṃ na hi jñānaṃ na muktir na api sat-gatih,<br>ataḥ prayatnato vidvān sevayā toṣayet gurum. 21* |
| सेवया सम्प्रसन्नात्मा गुरुः शिष्यं प्रबोधयेत् ।<br>न त्वं देहो नेन्द्रियाणि न प्राणो न मनोधियः ॥ २२॥ | *sevayā samprasannātmā guruḥ śiṣyaṃ prabodhayet,<br>na tvaṃ dehaḥ na indriyāṇi na prāṇaḥ na manodhiyaḥ. 22* |
| एषां द्रष्टा च साक्षी त्वं सच्चिदानन्दविग्रहः ।<br>प्रतिबन्धकशून्यस्य ज्ञानं स्यात् श्रुतिमात्रतः ॥ २३॥ | *eṣām draṣṭā ca sākṣī tvaṃ sat-cit-ānanda-vigrahah,<br>pratibandhaka-śūnyasya jñānaṃ syāt śruti-mātrataḥ. 23* |

| | |
|---|---|
| न चेन्मननयोगेन निदिध्यासनतः पुनः ।<br>प्रतिबन्धक्षये ज्ञानं स्वयमेवोपजायते ॥ २४॥ | *na cet manana-yogena nididhyāsanataḥ punaḥ,*<br>*pratibandha-kṣaye jñānaṃ svayam eva upajāyate. 24* |
| विस्मृतं स्वरूपं तत्र लब्ध्वा चामीकरं यथा ।<br>कृतार्थः परमानन्दो मुक्तो भवति तत्क्षणम् ॥ २५॥ | *vismṛtam svarūpam tatra labdhvā cāmīkaraṃ yathā,*<br>*kṛtārthḥ paramānandaḥ muktaḥ bhavati tat-kṣaṇam. 25* |
| अर्जुन उवाच ।<br>जीवः कर्ता सदा भोक्ता निष्क्रियं ब्रह्म यादव ।<br>ऐक्यज्ञानं तयोः कृष्ण विरुद्धत्वात् कथं भवेत् ॥ २६॥ | *arjuna uvāca*<br>*jīvaḥ kartā sadā bhoktā niṣkriyaṃ brahma yādava,*<br>*aikya-jñānaṃ tayoḥ kṛṣṇa viruddhatvāt kathaṃ bhavet. 26* |
| एतन्मे संशयं छिन्धि प्रपन्नोऽहं जनार्दन ।<br>त्वां विना संशयच्छेत्ता नास्ति कश्चिद्विनिश्चयः॥ २७॥ | *etat me samṣayaṃ chindhi prapanno 'ham janārdana,*<br>*tvāṃ vinā samṣaya-chettā nāsti kaścit viniścayaḥ. 27* |
| श्रीवासुदेव उवाच ।<br>संशोध्य त्वं-पदं पूर्वं स्वरूपमवधारयेत् ।<br>प्रकारं शृणु वक्ष्यामि वेदवाक्यानुसारतः ॥ २८॥ | *śrīvāsudeva uvāca*<br>*samṣodhya tvam-padaṃ pūrvaṃ svarūpam avadhārayet,*<br>*prakāraṃ śṛṇu vakṣyāmi veda-vākyānusārataḥ. 28* |
| देहत्रयं जडत्वेन नाश्यत्वेन निराशय ।<br>स्थूलं सूक्ष्मं कारणं च पुनः पुनर्विचारय ॥ २९॥ | *deha-trayaṃ jaḍatvena nāśyatvena nirāśaya,*<br>*sthūlam sūkṣmam kāraṇam ca punaḥ punar vicāraya. 29* |
| काष्ठादि लोष्टवत् सर्वमनात्मजडनश्वरम् ।<br>कदलीदलवत् सर्वं क्रमेणैव परित्यज ॥ ३०॥ | *kāṣṭhādi- loṣṭavat sarvam anātma-jaḍa-naśvaram,*<br>*kadalī-dalavat sarvaṃ krameṇa eva parityaja. 30* |
| तद्बाधस्य हि सीमानं त्यागायोग्यं स्वयम्प्रभम् ।<br>त्वमात्मत्वेन संविद्धि चेति "त्वं"-पद-शोधनम् ॥ ३१॥ | *tat bādhasya hi sīmānaṃ tyāga-ayogyaṃ svayam-prabham,*<br>*tvam ātmatvena saṃ-viddhi ca iti "tvaṃ"-pada-śodhanam. 31* |
| तत्पदस्य च पारोक्ष्यं मायोपाधिं परित्यज ।<br>तदधिष्ठानचैतन्यं पूर्णमेकं सदव्ययम् ॥ ३२॥ | *tat-padasya ca pāroksyaṃ māyopādhiṃ parityaja,*<br>*tat-adhiṣṭhāna-caitanyaṃ pūrṇam ekaṃ sat avyayam. 32* |
| तयोरैक्यं महाबाहो नित्याखण्डावधारणम् ।<br>घटाकाशो महाकाश इवात्मानं परात्मनि ।<br>ऐक्यमखण्डभावं त्वं ज्ञात्वा तूष्णीं भवार्जुन ॥ ३३॥ | *tayor-aikyaṃ mahābāho nityākhaṇḍāvadhāraṇam,*<br>*ghaṭākāśaḥ mahākāśaḥ iva ātmānaṃ parātmani,*<br>*aikyam akhaṇḍa-bhāvaṃ tvaṃ jñātvā tūṣṇīṃ bhava arjuna. 33* |
| ज्ञात्वैवं योगयुक्तात्मा स्थिरप्रज्ञः सदा सुखी ।<br>प्रारब्धवेगपर्यन्तं जीवन्मुक्तो विहारवान् ॥ ३४॥ | *jñātvā evaṃ yoga-yuktātmā sthira-prajñaḥ sadā sukhī,*<br>*prārabdha-vega-paryantaṃ jīvat-mukto vihāravān. 34* |
| न तस्य पुण्यं न हि तस्य पापं निषेधनं नैव पुनर्न वैधम् ।<br>सदा स मग्नः सुखवारिराशौ वपुश्चरेत् प्राक्कृतकर्मयोगात् ॥ ३५॥ | *na tasya punyaṃ na hi tasya pāpaṃ niṣedhanam na eva punar na vaidham,*<br>*sadā saḥ magnaḥ sukha-vāri-rāśau vapuś caret prāk-kṛta-karma-yogāt. 35* |
| इत्यध्यात्मविद्यायां योगशास्त्रे शान्तिगीतायां<br>श्रीवासुदेवर्जुनसंवादे द्वितीयोऽध्यायः ॥ | *iti adhyātma-vidyāyāṃ yoga-śāstre śānti-gītāyāṃ*<br>*śrīvāsudeva-arjuna-saṃvāde dvitīyo 'dhyāyaḥ.* |